ऽक्रियावतां चिकित्सारहितानाम् ।” इति भावप्रकाशः ॥

याप्ययानं, क्ली, (याप्यं अधमं यानम् ।) शिविका । इत्यमरः । २ । ८ । ५३ ॥

याभः, पुं, ( यभ्यते इति । यभ + घञ् । ) मैथुनम् । यथा । वृषाश्वयोर्याभेऽर्थे सन् । इति लिङ्गपादे वोपदेवः । ८४६ ॥ ( यथा, भागवते । ९ । १९ । ६ ।
“पीवानं श्मश्रुलं प्रेष्ठं मीढ्वांसं याभकोविदम् ।
स एकोऽजवृषस्तासां बह्वीनां रतिवर्द्धनः ।
रेमे कामग्रहग्रस्त आत्मानं नावबुध्यत ॥” )

यामः, पुं, ( याति यायते वा । या + “अर्त्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन् ।” उणा० १।१४० । इति मन् । यम + घञ् वा ।) दिवारात्र्योश्चतुर्थभागैकभागः । तत्पर्य्यायः । प्रहरः २ । इत्यमरः । १।४।६ ॥ (यथा, मनौ । ७ । १४५ ।
“उत्थाय पश्चिमे यामे कृतशौचः समाहितः ।
हुताग्निर्ब्राह्मणांश्चार्च्य प्रविशेत् स शुभां सभाम् ॥” )
संयमः । इति मेदिनी । मे, २४ ॥ ( गमनम् । यथा, ऋग्वेदे । १ । ४८ । ४ ।
“उषो ये ते प्र यामेषु युञ्जते ।”
“यामेषु गमनेषु ।” इति तद्भाष्ये सायणः ॥ गमनसाधनः । यथा, ऋग्वेदे । ४ । ५१ । ४ ।
“कुवित्स देवीः सनयो नवो वा
यामो बभूयादुषसो वो अद्य ॥”
“यामो गमनसाधनः स रथः ।” इति सायणः ॥ देवगणभेदः । यथा, मार्कण्डेयपुराणे ।१५।१८।
“यज्ञस्य दक्षिणायान्तु पुत्त्रा द्वादश जज्ञिरे ।
यामा इति समाख्याता देवाः स्वायम्भुवेऽन्तरे ॥”)

यामघोषः, पुं, ( यामे प्रतियामे घोषः रवोऽस्य । प्रतिप्रहरं रवकरणादेवास्य तथात्वम् । ) कुक्कुटः । इति शब्दमाला ॥

यामघोषा, स्त्री, (यामे यामे घोषोऽस्याः । यामान् प्रहरान् घोषति शब्दायत इति वा । घुष + अच् । टाप् ।) यन्त्रविशेषः । घड़ी इति भाषा । तत्पर्य्यायः । नाली २ घटी ३ यामनाली ४ यमेरुका ५ दण्डढक्का ६ । इति त्रिकाण्डशेषः ॥

यामनाली,, स्त्री, ( यामस्य नालीव । ) यामघोषा । इति त्रिकाण्डशेषः ॥

यामनेमिः, पुं, इन्द्रः । इति त्रिकाण्डशेषः ॥

यामलं, क्ली, युगलम् । इति हेमचन्द्रः । ६ । ६० ॥ तन्त्रशास्त्रविशेषः । तस्य लक्षणं यथा,—
“सृष्टिश्च ज्योतिषाख्यानं नित्यकृत्यप्रदीपनम् ।
क्रमसूत्रं वर्णभेदो जातिभेदस्तथैव च ।
युगधर्म्मश्च संख्यातो यामलस्याष्टलक्षणम् ॥”
तत्तु षड्विधम् । आदियामलम् १ ब्रह्मयामलम् २ विष्णुयामलम् ३ रुद्रयामलम् ४ गणेशयामलम् ५ आदित्ययामलम् ६ । इति वाराहीतन्त्रम् ॥ एषां श्लोकसंख्या तन्त्रशब्दे द्रष्टव्या ॥

यामवती, स्त्री, ( यामः प्रहरः अस्त्यस्यामिति ॥ याम + मतुप् । मस्य व ङीप् । ) रात्रिः । इति राजनिर्घण्टः ॥

यामाता, [ऋ] पुं, ( जामाता पृषोदरादित्वात् । जस्य यः ।) जामाता । दुहितुः पतिः । इत्यमरटीका शब्दरत्नावली च ॥ यामातुर्विष्णुतुल्यत्वं तस्य गृहे कन्यादातुर्दौहित्रजननात् प्राक् भोजननिषेधश्च यथा, कामधेनावादित्यपुराणम् ।
“विष्णुं यामातरं मन्ये तस्य मन्युं न कारयेत् ।
अप्रजायान्तु कन्यायां नाश्नीयात्तस्य वै गृहे ॥”
इत्युद्वाहतत्त्वम् ॥

यामार्द्धं, क्ली, ( यामस्यार्द्धम् । ) प्रहरस्यार्द्धम् । तस्याधिपा यथा,—
“वारेशादर्द्धयामेषु रात्र्यह्नोः पञ्च षट्क्रमात् ।
अधिपाः सुग्रहास्तत्र यथार्काहे भवन्ति हि ॥
रवीन्द्विन्दुभृगुज्याधशनिज्ञरवयो निशि ।
रविशुक्रज्ञराचीशशनीन्दुकुजभास्कराः ॥
दिने तृप्ताः परेष्वेवं तत्राद्यश्चाष्टमो ग्रहाः ।
पापदण्डे भवेद्विघ्नः शुभदण्डे शुभं भवेत् ॥
शुभग्रहस्य दण्डे तु कर्म्मारम्भाच्छुभं भवेत् ।
आरम्भात् पापदण्डे तु कर्म्म निष्फलतां व्रजेत् ॥
यस्यार्द्धयामस्तस्यैव प्राग्दण्डः समुदाहृतः ।
षट् षट् परीत्य दण्डाश्च त्रयो रात्रौ मतास्तथा ॥
यामार्द्धाधिपसंख्यातो द्वितीयस्तु तदर्द्धतः ।
तदर्द्धात्तु तृतीयः स्यात्तदर्द्धात्तु तुरीयकः ॥
अङ्काभावे तु राहुः स्यात्तदङ्को वसुसंख्यकः ।
भग्नाङ्कस्य परित्यागाद्द्विवाद्दण्डाधिपा यथा ॥”
इति ज्योतिषतत्त्वम् ॥

यामिः, स्त्री, ( याति कुलात् कुलान्तरमिति । या + बाहुलकात् मिः । ) स्वसा । कुलस्त्री । इत्यमरः । २ । ६ । १४२ ॥ “स्वसा भगिनी । कुलस्त्री कुलवधूः । प्रहरे संयमे यामो यामिः स्वसृकुलस्त्रियोरित्यन्तःस्थादौ रभसः ॥ जिह्मस्तु कुटिले निन्द्ये जामिः स्वसृकुलस्त्रियोरिति चवर्गतृतीयादावजयः इति भरतसुकुटौ ॥ यथा, जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः ॥ इति स्वामी ॥ जे चये बाहुलकान्मिः । यद्वा जसु अदने बाहुलकादिण् जामिरिति । अन्तःस्थादौ या प्रापणे धातुर्बोध्यः ।” इति रामाश्रमः ॥ (यथा, मनौ । ४ । १८३ ।
“यामयोऽप्सरसां लोके वैश्वदेवस्य बान्धवाः ॥”)
यामिनी । इति शब्दरत्नावली ॥ धर्म्मस्य पत्नी । तस्याः कन्या नागवीथी । यथा,—
“अरुन्धती वसुर्यामिर्लम्बा भानुर्मरुत्वती ।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च नामतः ।
धर्म्मपत्न्यो दश त्वेतास्तास्वपत्यानि मे शृणु ।
लम्बायाश्चैव घोषोऽसौ नागवीथी तु यामिजा ॥”
इति वह्निपुराणे कश्यपीयप्रजासर्गः ॥

यामिकभटः, पुं, ( यामे यामे नियुक्तः । याम + ठक् । स चासौ भटश्चेति ।) प्रहरिकः । चौकीदार इति भाषा । यथा,—
“उन्मादाम्बुदवर्हितान्धतमसः प्रभ्रष्टदिङ्मण्डले काले जाग्रदुदग्रयामिकभटप्रारब्धकोलाहले ।
कर्णस्यासुहृदर्णवाम्बुवड़वावह्नेर्यदन्तःपुराद्यातासि यदम्बुजाक्षि ! कृतकं मन्ये भयं योषिताम् ॥”
इति कर्णाटः ॥

यामित्रं, क्ली, लग्नात् सप्तमराशिः । यथा,—
“धीस्थानं पञ्चमं ज्ञेयं यामित्रं सप्तमं स्मृतम् ।
द्यूनं दूनं तथास्ताख्यं षट्कोणं रिपुमन्दिरम् ॥”
यामित्रवेधो यथा,—
“पापात् सप्तमगः शशी यदि भवेत् पापेन युक्तोऽथवा
यत्नेनाशु विवर्जयन्मुनिमतो दोषोऽप्ययं कथ्यते ।
यात्रायां विपदो गृहे सुतवधः चौरेषु रोगोद्भवो-
ऽप्युद्वाहे विधवा व्रते तु मरणं मूलञ्च पुंस्कर्म्मणि ॥
रविमन्दकुजाक्रान्तं लग्नाङ्कात् सप्तमं त्यजेत् ।
विवाहयात्राचूड़ासु गृहकर्म्मप्रवेशने ॥”
इति यामित्रवेधः ॥ * ॥
अस्य प्रतिप्रसवो यथा ।
“मूलत्रिकोणनिजमन्दिरगोऽथ पूर्णो
मित्रर्क्षसौम्यगृहगोऽथ तदीक्षितो वा ।
यामित्रवेधविहितानपहृत्य दोषान्
दोषाकरः सुखमनेकविधं विधत्ते ॥”
इति ज्योतिस्तत्त्वम् ॥

यामिनी, स्त्री, (यामाः सन्त्यस्याम् । याम + इनिः । ङीप् ।) रात्रिः ॥ (यथा, महाभारते ।१२।५३।१।
“ततः शयनमाविश्य प्रसुप्तो मधुसूदनः ।
याममात्रार्द्धशेषायां यामिन्यां प्रत्यबुध्यत ॥”)
हरिद्रा । इत्यमरः । १ । ४ । ४ ॥ (कश्यपपत्नी । यथा, भागवते । ६ । ६ । २१ ।
“तार्क्षस्य विनता कद्रुः पतङ्गी यामिनीति च ।
पतङ्गासूत पतगान् यामिनी शलभानथ ॥”
प्रह्लादस्य द्वितीया तनया । यथा, कथासरित्सागरे । ४६ । २२ ।
“प्रह्लादो यामिनीं नाम द्वितीयां तनयां ददौ ॥”)

यामिनीपतिः, पुं, ( यामिन्याः पतिः । ) चन्द्रः । इति शब्दरत्नावली ॥ ( यथा, भागवते । १० । ३५ । २५ ।
“यदुपतिर्द्विरदराजविहारो
यामिनीपतिरिवैष दिनान्ते ।
मुदितवक्त्र उपयाति दुरन्तं
मोचयन् व्रजगवां दिनतापम् ॥”)
कर्पूरम् । इत्यमरः ॥

यामी, स्त्री, ( यमस्येयम् । यमो देवतास्याः इति वा । यम + अण् । ङीप् ।) दक्षिणदिक् । इति राजनिर्घण्टः ॥ ( यथा, ज्योतिषे ।
“——— याम्यां गुरौ न व्रजेत् ।”
यामि + ङीष् । ) कुलस्त्री । इति शब्दरत्नावली ॥ (यथा, मनौ । ४।१८० ।
“मातापितृभ्यां यामीभिर्भ्रात्रा पुत्त्रेण भार्य्यया ।
दुहित्रा दासवर्गेण विवादं न समाचरेत् ॥”